# O. P. JINDAL SCHOOL, SAVITRI NAGAR

**Periodic Test-3** (Round-I) **(2025– 2026)**

**Class: IX** **MM: 20**

**Subject: Sanskrit** **Time: 1. Hr.**

Name: ______________________ Class / Section: ________ Roll No.:__________

*General Instructions:- All questions are compulsory*

**प्र0 1 अधोलिखितम् अनुच्छेदं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

(निम्नलिखित गद्यांश को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर लिखिए)

ततश्च सा साध्वी भर्तुः शुश्रूषां कृत्वा भिक्षामादाय मुनेः अन्तिकम् आगता। स च मुनिः बद्धांजलिः तामवदत् – ''कथं त्वया अनन्यगोचरो बलाकावृतान्तो ज्ञात इति ब्रूहि, ततो भिक्षां ग्रहीष्ये।'' सा अवदत् – ''मुने! न भर्तृसेवया अपरं कंचन धर्मं करोमि अहम्।तत्प्रसादेन एव मे एतादृशं विज्ञानम्। किंच इतः धर्मव्याधाख्यं कंचन मांस–विक्रयिणं गत्वा एतत् पृच्छ। ततस्ते श्रेयो भविष्यति त्वं च निरहंकारः भविष्यसि इति।'' एवं सर्वविदा पतिव्रतया अभिहितः गृहीतातिथिसत्कारः स मुनिः तां प्रणम्य तत् गृहात् निरगच्छत्।

**I एकपदेन उत्तरत –** **(½X2=1)**

i साध्वी किम् आदाय मुनेः अन्तिकम् आगता ?

ii मांसविक्रयिणः किं नाम आसीत् ?

**II पूर्णवाक्येन उत्तरत–** **(2X1=2)**

i सा मुनिं किम् अवदत् ?

ii कीदृशः मुनिः तां प्रणम्य निरगच्छत् ?

**III प्रदत्त विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत–** **(½X4=2)**

i अनुच्छेदे ''भविष्यति'' इति क्रियापदस्य कर्तृपदम् किम् ?

(अ) त्वम् (ब) अहम्
(स) श्रेयः (द) ताः

ii 'अकल्याणम्/प्रेयः' इत्यस्य पदस्य विपरीतार्थकम् किम् ?

(अ) भर्तुः (ब) ज्ञातः
(स) अभिहितः (द) श्रेयः

iii अनुच्छेद 'समीपम्' इत्यस्य पदस्य कृते किं पदम् आगतम् ?

(अ) अन्तिकम् (ब) आदाय
(स) एतत् (द) ज्ञातम्

iv 'तत्प्रसादेन एव मे' अत्र 'मे' इति सर्वनाम पदं कस्मै प्रयुक्तम् ?

(अ) मुनये (ब) बलाकायै
(स) धर्मव्याधाय (द) गृहिण्यै

प्र0 2 **अधोलिखितेषु रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत**–*(कोई चार)*(1X4=4)

(रेखांकित पदों के आधार पर प्रश्ननिर्माण कीजिए)

**(क)** धर्मव्याधः <u>मातापित्रोः</u> भक्तः आसीत्।

**(ख)** मुनिः <u>ब्राह्मणगृहं</u> गत्वा भिक्षाम् अयाचत।

**(ग)** पुरा <u>महातपा</u> नाम मुनिः आसीत्।

**(घ)** <u>अहङ्कारेण</u> ज्ञानं नश्यति।

**(ङ)** <u>वृक्षस्य</u> उपरि बलाका आसीत्।

प्र0 3 **अधोलिखितप्रश्नानाम् यथानिर्देशम् उत्तरत**–*(कोई चार)* (1X4=4)

(निर्देशानुसार निम्नलिखित चार प्रश्नों के सही उत्तर लिखिए)

(क) 'सा विहस्य अभाषत।' अस्मिन् वाक्ये क्रियापदं किम् ?

(ख) 'साध्वी भिक्षामादाय मुनेः अन्तिकम् आगता' अस्मिन् वाक्ये 'समीपे' इति पदस्य किं पर्यायपदं प्रयुक्तम् ?

(ग) 'सः मुनिः बद्धांजलिः तामवदत्।' अत्र 'बद्धांजलिः' इति पदस्य विशेष्यपदं किम् अस्ति?

(घ) 'गृहीतातिथिसत्कारः मुनिः तां प्रणम्य निरगच्छत्' अत्र 'मुनिः' पदस्य विशेषणपदं किम्?

(ङ) 'स च क्रुद्धस्तां व्यलोकयत्।' अस्मिन् वाक्ये 'प्रसन्नः' इति पदस्य विलोमपदं किम् ?

प्र0 4 **अधोलिखितवाक्येषु स्थूलपदानाम् संधि–विच्छेदं वा प्रदत्तः विकल्पेभ्यः चित्वा लिखत**–
*(केवलं प्रश्नचतुष्टयम्)* (1X4=4)

(निम्नलिखित वाक्यों में स्थूलपदों को उचित विकल्पों संधि या विच्छेद कीजिए)

i **षडाननः** इति कार्तिकेयस्य पर्यायः।

(क) षट् + ननः (ख) षड् + आननः

(ग) षट् + आननः (घ) षट् + अननः

ii **वाक् + ईशः** मम मित्रम् अस्ति।

(क) वाकीशः (ख) वागीशः

(ग) बागीशः (घ) वाकईशः

iii **सुबन्तः** शब्दरूपाणि भवन्ति।

(क) सुप् + अन्तः (ख) सुब् + अन्त

(ग) सुबन् + तः (घ) सुप् + बन्तः

**iv** **हरिम् + वन्दे** जगत् गुरुम्।

(क) हरे वन्दे (ख) हरीं वन्दे

(ग) हरिं वन्दे (घ) हरिम्बन्दे

**v** **अहं गच्छामि** प्रतिदिनं विद्यालयम्।

(क) अहम् + गच्छामि (ख) अहम् + आगच्छामि

(ग) अहां + गच्छाति (घ) आहम् + गच्छानि

**प्र0 5 भवती भाविका। भवतां विद्यालये गीतायाः श्लोकानां अन्त्याक्षरी आयोज्यते। स्व मित्रं रेखां प्रति लिखिते अस्मिन् पत्रे मंजूषातः रिक्तस्थानानि पूरयत पत्रं च पुनः लिखत–**
(आप भाविका हैं। आपके विद्यालय में आयोजित गीता के श्लोकों की अन्त्याक्षरी का विवरण देते हुए मित्र रेखा को पत्र लिखिए) **(½x6=3)**

पूर्वांचल छात्रावासः

आदर्श संस्कृत महाविद्यालयः

रायपुरतः,

दिनांक -------

प्रिय सखी, (1) -----------

नमोनमः

अत्र सर्वम् कुशलम्। अस्माकं विद्यालये संस्कृत दिवसे एका (2) ------ आयोज्यते। अस्माकं प्रतियोगिता (3) ------ कक्षायाः विद्यार्थिभिः सह भविष्यति। अहं स्व कक्षायाः प्रतिनिधि। भवान् अपि तस्मिन् दिवसे अत्र आगत्य (4) ----- पश्यतु इति प्रार्थ्यते।

भवत्यः पितृ चरणयोः (5) ------।

(6) -------- अभिन्न मित्रम्।

**भाविका**

| |
|---|
| कार्यक्रमम्, अन्त्याक्षरीप्रतियोगिता, प्रणामाः, रेखा, भवताम्, दशम्याः, |

---000---